# *શિવ મહિમ્ન સ્તોત્રમ*

*પુષ્પદન્ત કૃત*

પુષ્પદન્ત ઉવાચ

મહિમ્ન: પારં તે પરમ વિદુષો ચદ્ય સદૃશી
સ્તુતિ: બ્રહ્માદીનાં અપિ તદવસન્ના: ત્વયિ ગિર: ।
અથાટવાચ્ચ: સર્વ: સ્વમતિ પરિમાણાવધિ ગૃણન
મમાપ્યેષ સ્તોત્રે હર નિરપવાદ: પરિકર: ॥ 1 ॥

અતીત: પંથાનં તવ ચ મહિમા વાઙ્મનસયો:
અતદ્વ્યાવૃત્ત્યા ચં ચકિતમભિધત્તે શ્રુતિરપિ ।
સ કસ્ય સ્તોતવ્ય: કતિવિધગુણ: કસ્ય વિષય:
પદે ત્વર્વાચીને પતતિ ન મન: કસ્ય ન વચ: ॥ 2 ॥

મધુસ્ફીતા વાચ: પરમમૃતં નિર્મિતવત:
તવ બ્રહ્મન કિં વાગપિ સુરગુરો: વિસ્મય પદમ ।
મમ ત્વેતાં વાણીં ગુણકથન પુણ્યેન ભવત:
પુનામિ ઈત્યર્થેટસ્મિન પુરમથન બુદ્ધિ: વ્યવસિતા ॥ 3 ॥

તવૈશ્વર્યં યત્ત: જગદુદય રક્ષાપ્રલયકૃત
ત્રયીવસ્તુ વ્યસ્તં તિસ્રુષુ ગુણભિન્નાસુ તનુષુ ।
અભવ્યાનાં અસ્મિન વરદ રમણીયાં અરમણીં
વિહન્તું વ્યાક્રોશીં વિદધત ઈહૈકે જડધિય: ॥ 4 ॥

કિમીહ: કિન્કાય: સ ખલુ કિં ઉપાય: ત્રિભુવનં
કિમાધારો ધાતા સૃજતિ કિમુપાદાન ઈતિ ચ ।
અતર્ક્યૈશ્વર્યે ત્વય્યનવસર દુ:સ્થો હતધિય:
કુતર્કોટયં કાંશ્ચિત મુખરયતિ મોહાય જગત: ॥ 5 ॥

અજન્માનો લોકા: કિં અવયવવન્તોટપિ જગતાં
અધિષ્ઠાતારં કિં ભવવિધિરનાદૃત્ય ભવતિ ।
અનીશો વા કુર્યાદ ભુવન જનને ક: પરિકરો
યતો મન્દાસ્ત્વાં પ્રત્યમરવર સંશેરત ઈમે ॥ 6 ॥

ત્રયી સાઙ્ખ્યં યોગ: પશુપતિમતં વૈષ્ણવં ઈતિ
પ્રભિન્ને પ્રસ્થાને પરમિદમદ: પથ્યમિતિ ચ ।
રુચીનાં વૈચિત્ર્ય અદૃજુકુટિલ નાનાપથજુષાં
નૃણામેકો ગમ્ય: ત્વમસિ પયસામર્ણવ ઈવ ॥ 7॥

મહોક્ષ: ખટ્વાઙ્ગં પરશુરજિનં ભસ્મ ફણિન:
કપાલં ચેતીયત્તવ વરદ તન્ત્રોપકરણમ ।
સુરાસ્તાં તામૃદ્ધિં દધતિ તુ ભવદ્ભૂ પ્રણિહિતાં
ન હિ સ્વાત્મારામં વિષય મૃગતૃષ્ણા ભ્રમયતિ ॥ 8 ॥

ધ્રુવં કશ્ચિત સર્વં સકલં અપરસ્ત્વ ધ્રુવમિદં
પરો ધ્રૌવ્યાટધ્રૌવ્યે જગતિ ગદતિ વ્યસ્તવિષયે ।
સમસ્તેટપ્યે તસ્મિન પુરમથન તૈર્વિસ્મિત ઈવ
સ્તુવન જિહ્રેમિ ત્વાં ન ખલુ નનુ ધૃષ્ટા મુખરતા ॥ 9॥

તવૈશ્વર્યં યત્નાદ યદુપરિ વિરિઞ્ચિ: હરિરધ:
પરિચ્છેતું યાતાવનિલં અનલ સ્કન્ધ વપુષ: ।
તતો ભક્તિશ્રદ્ધા ભરગુરુ ગૃણદ્ભ્યાં ગિરિશ યત
સ્વયં તસ્થે તાભ્યાં તવ કિં અનુવૃત્તિર્ન ફલતિ ॥ 10 ॥

અયત્નાદાસાદ્ય ત્રિભુવનં અવૈરવ્યતિકરં
દશાસ્યો યદ્બાહૂનભૃત રણકણ્ડૂ પરવશાન ।
શિર:પદ્મશ્રેણી રચિત ચરણામ્ભોરુહ બલે:
સ્થિરાયા: ત્વદ્ભકતે: ત્રિપુરહર વિસ્ફૂર્જિતં ઈદમ ॥ 11 ॥

અમુષ્ય ત્વત્સેવા સમધિગતસારં ભુજવનં
બલાત કૈલાસેટપિ ત્વદધિવસતૌ વિક્રમયતઃ ।
અલભ્યા પાતાલેટપ્યલસ ચલિતાટન્ગુષ્ઠ શિરસિ
પ્રતિષ્ઠા ત્વય્યાસીદ ધ્રુવમુપચિતો મુહ્યતિ ખલઃ ॥ 12 ॥

યદૃદ્ધિં સુત્રામ્ણો વરદ પરમોચ્ચૈરપિ સતીં
અધશ્ચક્રે બાણઃ પરિજન વિધેય ત્રિભુવનઃ ।
ન તચ્ચિત્રં તસ્મિન વરિવસિતરિ ત્વચ્ચરણયોઃ
ન કસ્યાપ્ય ઉન્નત્યૈ ભવતિ શિરઃ અસ્ત્વચ્ચવનતિઃ ॥ 13 ॥

અકાણ્ડ બ્રહ્માણ્ડ ક્ષયચકિત દેવાસુરકૃપા
વિધેયસ્યાટટસીદ યસ્ત્રિનયન વિષં સંહૃતવતઃ ।
સ કલ્માષઃ કણ્ઠે તવ ન કુરુતે ન શ્રિયમહો
વિકારોટપિ શ્લાઘ્યો ભુવન ભય ભઙ્ગ વ્યસનિનઃ ॥ 14 ॥

અસિદ્ધાર્થા નૈવ કવચિદપિ સદેવા સુરનરે
નિવર્તન્તે નિત્યં જગતિ જયિનો યસ્ય વિશિખાઃ ।
સ પશ્યન્નીશ ત્વાં ઈતર સુર સાધારણમભૂત
સ્મરઃ સ્મર્તવ્યાત્મા ન હિ વશિષુ પથ્યઃ પરિભવઃ ॥ 15 ॥

મહી પાદાઘાતાદ વ્રજતિ સહસા સંશયપદં
પદં વિષ્ણોર્ભ્રામ્યદ ભુજ પરિઘ રુગ્ણ ગ્રહ ગણમ ।
મુહુર્દ્યૌર્દૌસ્થ્યં યાત્યનિભૃત જટા તાડિત તટા
જગદ્રક્ષાયૈ ત્વં નટસિ નનુ વામૈવ વિભુતા ॥ 16 ॥

વિયદ્વ્યાપી તારાગણ ગુણિત ફેનોદ્રમ રુચિઃ
પ્રવાહો વારાં યઃ પૃષતલઘુદૃષ્ટઃ શિરસિ તે ।
જગત દ્વીપાકારં જલધિવલયં તેન કૃતમિતિ
અનેનૈવોન્નેયં ધૃતમહિમ દિવ્યં તવ વપુઃ ॥ 17 ॥

રથ: ક્ષોણી યન્તા શતધૃતિરગેન્દ્રો ધનુરથો
રથાઙ્ગે ચન્દ્રાર્કૌ રથ ચરણ પાણિ: શર ઈતિ ।
દિધક્ષોસ્તે કોટયં ત્રિપુરતૃણં આડંબર વિધિ:
વિધેયૈ: ક્રીડન્ત્યો ન ખલુ પરતન્ત્રા: પ્રભુધિય: ॥ 18 ॥

હરિસ્તે સાહસ્રં કમલ બલિમાધાય પદયો:
યદેકોને તસ્મિન નિજં ઉદહરન નેત્ર કમલમ ।
ગતો ભક્ત્યુદ્રેક: પરિણતિં અસૌ ચક્રવપુષ:
ત્રયાણાં રક્ષાયૈ ત્રિપુરહર જાગર્તિ જગતામ ॥ 19 ॥

ક્રતૌ સુપ્તે જાગ્રત ત્વમસિ ફલયોગે ક્રતુમતાં
ક્વ કર્મ પ્રધ્વસ્તં ફલતિ પુરુષારાધનમૃતે ।
અતસ્ત્વાં સંપ્રેક્ષ્ય ક્રતુષુ ફલદાન પ્રતિભુવં
શ્રુતૌ શ્રદ્ધાં બધ્વા દૃઢપરિકર: કર્મસુ જન: ॥ 20 ॥

ક્રિયાદક્ષો દક્ષ: ક્રતુપતિ: અધીશ: તનુભૃતાં
ઋષીણાં આર્ત્વિજ્યં શરણદ સદસ્યા: સુરગણા: ।
ક્રતુભ્રંશ: ત્વત્ત: ક્રતુફલ વિધાન વ્યસનિન:
ધ્રુવં કર્તું શ્રદ્ધા વિધુરં અભિચારાય હિ મખા: ॥ 21 ॥

પ્રજાનાથં નાથ પ્રસભમભિકં સ્વાં દુહિતરં
ગતં રોહિદ ભૂતાં રિરમયિષુ મૃષ્યસ્ય વપુષા ।
ધનુષ્પાણેર્યાતં દિવમપિ સપત્રાકૃતં અમું
ત્રસન્તં તેટદ્યાપિ ત્યજતિ ન મૃગવ્યાધરભસ: ॥ 22 ॥

સ્વલાવણ્યાશંસા ધૃત ધનુષં અહ્નાય તૃણવત
પુર: પ્લુષ્ટં દૃષ્ટ્વા પુરમથન પુષ્પાયુધં અપિ ।
યદિ સ્ત્રૈણં દેવી યમનિરત દેહાર્ધ ઘટનાત
અવૈતિ ત્વામદ્ધા બત વરદ મુગ્ધા યુવતય: ॥ 23 ॥

શ્મશાનેષ્વાક્રીડા સ્મરહર પિશાચા: સહચરા:
ચિતા ભસ્માલેપ: સ્રગપિ નૃકરોટી પરિકર: ।
અમઙ્ગલ્યં શીલં તવ ભવતુ નામૈવં અખિલં
તથાપિ સ્મર્તૃણાં વરદ પરમં મઙ્ગલં અસિ ॥ 24 ॥

મન: પ્રત્યક ચિત્તે સવિધમ વિધાયાત્ત મરુત:
પ્રહૃષ્યદ્રોમાણ: પ્રમદ સલિલોત સઙ્ગતિદૃશ: ।
યદા લોક્યા અહ્લાદં હૃદ ઈવ નિમજ્ય અમૃતમયે
દધત્યન્ત: તત્ત્વં કિમપિ યમિનસ્તત કિલ ભવાન ॥ 25 ॥

ત્વમર્ક: ત્વં સોમ: ત્વમસિ પવન: ત્વં હુતવહ:
ત્વં આપ: ત્વં વ્યોમ ત્વમુ ધરણિ: આત્મા ત્વં ઈતિ ચ ।
પરિચ્છિન્નાં એવં ત્વયિ પરિણતા બિભ્રતિ ગિરં
ન વિદ્મ: તત્તત્વં વયમિહ તુ યત ત્વં ન ભવસિ ॥ 26 ॥

ત્રયીં તિસ્રો વૃત્તી: ત્રિભુવનં અથો ત્રીનપિ સુરાન
અકારાદ્યૈ: વર્ણૈ: ત્રિભિરભિ દધત તીર્ણવિકૃતિ ।
તુરીયં તે ધામ ધ્વનિભિ: અવરુન્ધાનં અણુભિ:
સમસ્ત વ્યસ્તં ત્વાં શરણદ ગૃણાત્યોં ઈતિ પદમ ॥ 27 ॥

ભવ: શર્વો રુદ્ર: પશુપતિ રથોગ્ર: સહમહાન
તથા ભીમેશાનાવિતિ યદભિધાનાષ્ટકં ઈદમ ।
અમુષ્મિન પ્રત્યેકં પ્રવિચરતિ દેવ શ્રુતિરપિ
પ્રિયાયાસ્મૈ ધામ્ને પ્રણિહિત નમસ્યોટસ્મિ ભવતે ॥ 28 ॥

નમો નેદિષ્ઠાય પ્રિયદવ દવિષ્ઠાય ચ નમ:
નમ: ક્ષોદિષ્ઠાય સ્મરહર મહિષ્ઠાય ચ નમ: ।
નમો વર્ષિષ્ઠાય ત્રિનયન યવિષ્ઠાય ચ નમ:
નમ: સર્વસ્મૈ તે તદિદં અતિસર્વાય ચ નમ: ॥ 29 ॥

બહુલ રજસે વિશ્વોત્પત્તૌ ભવાય નમો નમ:
પ્રબલ તમસે તત સંહારે હરાય નમો નમ: ।
જન સુખકૃતે સત્ત્વોદ્રિક્તૌ મૃડાય નમો નમ:
પ્રમહસિ પદે નિસ્ત્રૈગુણ્યે શિવાય નમો નમ: ॥ 30 ॥

કૃશ પરિણતિ ચેત: ક્લેશવશ્યં ક્વ ચેદં
ક્વ ચ તવ ગુણ સીમોલ્લઙ્ઘિની શશ્વદૃદ્ધિ: ।
ઈતિ ચકિતમમન્દીકૃત્ય માં ભક્તિરાધાદ
વરદ ચરણયોસ્તે વાક્ય પુષ્પોપહારમ ॥ 31 ॥

અસિત ગિરિ સમં સ્યાત કજ્જલં સિન્ધુ પાત્રે
સુર તરુવર શાખા લેખની પત્રમુર્વી ।
લિખતિ યદિ ગૃહીત્વા શારદા સર્વકાલં
તદપિ તવ ગુણાનામીશ પારં ન યાતિ ॥ 32 ॥

અસુર સુર મુનીન્દ્રૈ: અર્ચિતસ્ય ઈંદુમૌલે:
ગ્રથિત ગુણ મહિમ્નો નિર્ગુણસ્ય ઈશ્વરસ્ય ।
સકલ ગણ વરિષ્ઠ: પુષ્પદન્તાભિધાન:
રુચિરમલઘુવૃત્તૈ: સ્તોત્રં એતચ્ચકાર ॥ 33 ॥

અહરહરનવદ્યં ધૂર્જટે: સ્તોત્રમેતત
પઠતિ પરમભક્ત્યા શુદ્ધ ચિત્ત: પુમાન ય: ।
સ ભવતિ શિવલોકે રુદ્રતુલ્ય: તથાટત્ર
પ્રચુરતર ધનાયુ: પુત્રવાન કીર્તિમાંશ્ચ ॥ 34 ॥

મહેશાન્ન અપરો દેવો મહિમ્નો નાપરા સ્તુતિ: ।
અઘોરાન્ન અપરો મન્ત્રો નાસ્તિ તત્ત્વં ગુરો: પરમ ॥ 35 ॥

દીક્ષા દાનં તપસ્તીર્થં જ્ઞાનં યાગાદિકા: ક્રિયા: ।
મહિમ્ન સ્તવ પાઠસ્ય કલાં નાર્હન્તિ ષોડશીમ ॥ 36 ॥

કુસુમદશન નામા સર્વ ગન્ધર્વ રાજ:
શશિધરવર મૌલે: દેવદેવસ્ય દાસ: ।
સ ખલુ નિજ મહિમ્નો ભ્રષ્ટ એવાસ્ય રોષાત
સ્તવનં ઈદં અકાર્ષીદ દિવ્ય દિવ્યં મહિમ્ન: ॥ 37 ॥

સુરગુરું અભિપૂજ્ય સ્વર્ગ મોક્ષૈક હેતું
પઠતિ યદિ મનુષ્ય: પ્રાંજલિ: ન અન્ય ચેતા: ।
વ્રજતિ શિવ સમીપં કિન્નરૈ: સ્તૂયમાન:
સ્તવનં ઈદં અમોઘં પુષ્પદન્ત પ્રણીતમ ॥ 38 ॥

શ્રી પુષ્પદન્ત મુહ પઙ્કજ નિર્ગતેન
સ્તોત્રેણ કિલ્બિષ હરેણ હર પ્રિયેણ
કણ્ઠ સ્થિતેન પઠિતેન સમાહિતેન
સુપ્રીણિતો ભવતિ ભૂતપતિ: મહેશ: ॥ 39 ॥

ઈત્યેષા વાઙ્મયી પૂજા શ્રીમત શઙ્કર પાદયો: ।
અર્પિતા તેન દેવેશ: પ્રીયતાં મે સદાશિવ: ॥ 40 ॥

આસમાપ્તં ઈદં સ્તોત્રં પુણ્યં ગન્ધર્વ ભાષિતં ।
અનૌપ્મયં મનોહારિ સર્વ ઈશ્વર વર્ણનમ ॥ 41 ॥

એકકાલં દ્વિકાલં વા ત્રિકાલં ય: પઠેન્નર: ।
સર્વપાપ વિનિર્મુક્ત: શિવ લોકે મહીયતે ॥ 42॥

॥ ઈતિ શ્રી પુષ્પદન્ત વિરચિતં શિવમહિમ્ન: સ્તોત્રં સંપૂર્ણમ ॥